International Journal of Sanskrit Research 2018; 4(1): 25-27

International Journal of Sanskrit Research

अनन्ता

ISSN: 2394-7519
IJSR 2018; 4(1): 25-27
© 2018 IJSR
www.anantaajournal.com
Received: 08-11-2017
Accepted: 09-12-2017

**विघ्नेश्वर भट्टः**
शोधच्छात्रः
कर्नाटकसंस्कृतविश्वविद्यालयः
बेङ्गलूरु, कर्नाटक, भारत

**Correspondence**
**विघ्नेश्वर भट्टः**
शोधच्छात्रः
कर्नाटकसंस्कृतविश्वविद्यालयः
बेङ्गलूरु, कर्नाटक, भारत

# सुबोधिन्यादिषु प्रतिपादितभावार्थभावनयोः अवलोकनम्

**विघ्नेश्वर भट्टः**

**प्रस्तावना**

**अवतरणिका**

धर्मप्रतिपिपादयिषुणा अधर्मनुनुत्सुना महर्षिणा जैमिनिना सूत्रजालमीमांसा प्रत्यपादीति अविवादः । विना प्रमाणं प्रमा नोपगच्छति इत्यतः प्रथमाध्याये धर्मे प्रमाणं विचारितम् । द्वितीये षट्कर्मभेदबोधकप्रमाणैः कर्मणां भेदः प्रतिपाद्यते । तृतीये शेषी शेषेण निष्पद्यते , अर्थात् फलदायकः भवति इति धिया शेषत्वं निरूपितम् । तद्बोधकानि षट् प्रमाणानि च तत्रैव निरूपितानि । चतुर्थे क्रतूपकारकाणां क्रत्वर्थानां तथा पुरुषार्थानां परस्परभेदान् अवबोध्य तौ निरूपितौ । पञ्चमे पूर्वापरभावरूपः क्रमः सुचिन्तितः । षष्ठे फलभोक्ता कः ? कस्य अधिकारः ? इत्यादीनां निरूपितत्वात् सोऽधिकाराध्यायः । सप्तमे सामान्यातिदेशः विकृत्युपयोगितया विचिन्तितः । स एवाष्टमे विशेषेण विचारितः । नवमे प्रकृतौ अन्यथादृष्टस्य विकृतौ अन्यथाभावत्वेन ऊहः सुचिन्तितः । दशमे प्रकृतिसम्बन्धिनः पदार्थस्य विकृत्यङ्गत्वग्राहकप्रमाणाभावरूपः बाधः विचारितः। एकादशे सकृदनुष्ठाने बहूनाम् उपकुर्वाणं तन्त्रं प्रतिपादितम् । द्वादशे अन्योद्देशेन कृतेन अन्यस्य उपकारकः प्रसङ्गः विचारितः ।

प्रथमाध्याये विध्यर्थवादमन्त्रस्मृत्याचारनामधेयवाक्यशेषसामर्थ्यरूपाणि अष्टौप्रमाणानि धर्माधर्मयोः निरूपितानि। द्वितीयाध्याये शब्दान्तरादिषट्प्रमाणकभावनाभेदः निरूप्यते। एवं धात्वर्थभेदस्तु भावनाभेदसिध्यर्थः क्वाचित्को निरूप्यते। भाट्टरहस्यतन्त्रवार्तिकभाष्यभाट्टदीपिकासुबोधिन्यादिषु मीमांसाग्रन्थेषु अयं विषयः बहुधा जिज्ञासितः। अपूर्वभेदोऽपि फलत्वेन निरूप्यते। अपूर्वभेदः अपूर्वसाधनभेदाधीनः अवान्तरव्यापाररूप अपूर्वं प्रति स्वर्गादेरेव साधनत्वात् स्वर्गादि फलं प्रति किं धात्वर्थस्स करणं उत उपपदार्थस्य सोमादेरपि इति चिन्तायाम् –

**पूर्वपक्षाक्षेपः**

पूर्वपक्षोऽभिधीयते क्रियान्वयित्वं कारकत्वम्, अतः कारकाणां क्रियया एव अन्वयस्य व्युत्पत्तिसिद्धत्वात् । धात्वर्थस्य करणत्वस्य सोमादिकरणत्वस्य च फलभाव्यकभावनान्वयात् द्वितीयबोधे सर्वेषाम् एव फलान्वयो युक्तः । ननु सोमादेः करणत्वं तावत् तितीयाश्रुत्या स्पष्टं ज्ञायते । धात्वर्थकरणत्वं तु ''यजेत'' इत्यत्र ''यागेन इष्टं भावयेत्'' इति लाक्षणिकतया अवगम्यते। अतः उभयोः मध्ये सोमाधिकरणत्वस्यैव प्राबल्यं खलु इति चेत् –

उच्यते – यदि एवं निरूपणेन उपपदार्थ सोमादेरेव करणत्वस्य प्राबल्यं, तदा धात्वर्थस्यापि प्राबल्यं वक्तुं शक्यते । यतः धात्वर्थस्य यागस्य भावनया समानपदोपात्तत्वेन तस्यैव क्रियया साकं शीघ्रोपस्थितिः भवति। एवं सोमादेः पदान्तरोपात्तत्वेन अन्तरतया उपस्थितिः भवति अतः धात्वर्थस्यैव प्राबल्यं अत्र वक्तव्यं भवति । तस्माद्द्वयमपि विहाय उभयोरपि तुल्यबलत्वं अङ्गीकृत्य उभयोः फलकरणकत्वं युक्तम् । समुच्चितयोः साधनत्वाऽसंभवेऽपि साधनयोः समुच्चयः इति सर्वेषां करणत्वम् ।

**समाधानम्**

अत्र सिद्धन्तोऽभिधीयते सिद्धान्तः – सर्वेषां फलसम्बन्धे फलसम्बन्धनिर्वाहाय कल्प्यमानम् अपूर्वं प्रतिपदार्थं कल्प्येतेति गौरवम् । एकस्यैव फलसम्बन्धे तु एकमेवापूर्वं कल्प्यमिति लाघवम् । अतः एकमेव पदं फलपदेन सम्बन्ध्यते। इतरपदन्तु तत्रैव कथंचित् विशेषणतया अन्वेति। एवम् एकस्यैव फलनिरूपिता करणता, अन्येषान्तु दृष्टविधयैव करणार्थत्वं इति सिद्धे तदिह धात्वर्थस्यैव फलकरणत्वे सोमादीनां तज्जनकत्वेनैव दृष्टार्थता। सोमादीनां करणत्वे च धात्वर्थस्य आश्रयविधया एव दृष्टार्थता इति न अनेकादृष्टकल्पना इति प्रतिपदाधिकरणम् ।

एवं स्थिते विशेषजिज्ञासायां सोमादेरेव फलकरणकत्वं इति ब्रूमः। यतः फलं नाम साध्यम् । अतः साध्यस्य तस्य स्वसिद्धये सिद्धपदार्थापेक्षा एव ज्ञायते न साध्यान्तरपेक्षा इति सिद्धपदार्थस्य

सोमस्यैवफलकरणकत्वं युक्तम् । एवं तृतीयायाः करणत्वे एव शक्ततत्वात्, तस्य करणत्वं युक्तम् । तथा च न पदश्रुत्या धात्वर्थस्य करणत्वम्– कारकश्रुत्यपेक्षया पदश्रुतेः दुर्बलत्वात् । तस्य लाक्षणिकत्वाच्च । ननु लाक्षणिकत्वेऽपि पदश्रुत्यवगतकरणत्वस्य उपपदार्थकरणत्वन्वयात्, पूर्वम् अन्वयेन प्राथम्यकृत प्राबल्यसत्वात् – यागादेरेव करणत्वं युक्तम् इति चेत् भावनान्वये पदश्रुति सत्वेऽपि भिन्नपदोपात्त फलान्वये तदभावात् अत एव यागादिधत्वर्थः सोमाद्यर्थ एव । इति प्राप्ते–

सिद्धान्तः –

पदश्रुत्यायगस्यैव करणत्वम्। यद्यपि फलान्वये न पदश्रुतिः। तथापि प्राथमिकभावनान्वयवेलायां यस्य यत् प्रमाणम् तिङन्तप्रत्ययस्य बलवत्वस्य तस्यां अवस्थायाम् अनिर्णायकत्वेऽपि पार्ष्टिक फलान्वये तस्य निर्णायकत्वात् । अतः प्राथमिकभावनान्वये विद्यमानापदश्रुतिः फलान्वये निर्णायिका । एवं न पदश्रुतेः कारकश्रुत्यपेक्षया दौर्बल्यम् । तस्याः लाक्षणिकत्वेऽपि यागकरणत्वस्य सोमकरणत्वान्वयात् प्राक् भावनायां अन्वितत्वेन तदन्वयस्य प्राथम्यात् यागकरणत्वस्य प्रथमान्वय स्वीकारे " परिपूर्णं पदं पदान्तरेणान्वेति इति न्यायात् तिङन्तपदस्य परिपूर्णत्वाभावे तदुपस्थापितभावनायां सोमस्य अन्वयमेव न स्यात् । अतः यागः फलसाधनं सोमो यागार्थः इति ।

एवं सति पुनः विचार्यते शाब्दबोधे किं धात्वर्थः मुख्यो वा उत प्रत्ययार्थो वेति। शाब्दबोधे प्रत्ययोपेतभावनाया एव मुख्यविशेष्यत्वम् आमनन्ति मीमांसकाः। तत्र प्रमाणन्तु "भावप्रधानमाख्यातम्" इति यास्कवचनम्। अनेन आख्यातेन प्रतीयमानेषु अनेकेषु अर्थेषु भावनाया एव प्राधान्यमित्यवगम्यते अत एव तस्याः मुख्यविशेष्यत्वमपि । प्रकृत्यर्थभूतधात्वर्थं प्रति तस्या एव विशेष्यत्वं "प्रकृतिप्रत्ययौ प्रत्ययार्थं सह ब्रूतः तयोस्तु प्रत्ययप्राधान्येन" इति सृत्या ज्ञायते।

अत्र वैय्याकरणाः

नैवं स्मृतिः सर्वेषामपि प्रत्ययार्थानां प्राधान्यं बोधयितुम् प्रभवति । घटे घटेन इत्यादौ प्रत्ययार्थलिङ्गसंख्ययोः प्राधान्याभावात् प्रत्युततयोः प्रकृत्यर्थ विशेषणस्यैव अनुभाविकत्वात् । अतः लिङ्गसंख्याव्यतिरिक्त्सुबर्थस्य प्रकृत्यर्थापेक्षया प्राधान्यबोधिका सा स्मृतिः इति अभ्युपगन्तव्यम्। तस्मात् आख्याताार्थातिरिक्तपरतया अस्याः सृतेः सङ्कोचकरणे न किमपि बाधकमिति अतः धात्वर्थस्यैव प्राधान्यं सिष्यति "भावप्रधानम्" इत्यत्र भावशब्दस्य धात्वर्थपरत्वात् इत्याहुः । तन्न प्रत्ययार्थप्राधान्यस्मृतेः संकोचे प्रमाणाभावादिति । "प्रत्ययार्थं सह ब्रूतः तयोऽस्तु प्रत्ययप्राधान्येन इत्येकवचनश्रवणेन प्रत्ययार्थत्वसामानाधिकरण्येन प्रकृत्यर्थं प्रति प्राधान्यनियमात्।

एवं च धत्वर्थस्य भावनायां प्रकारत्वेनान्वयः इति सिद्धे क्वाचित् शक्यार्थे एव अन्वयः यथा " सोमेन यजेत" इत्यादौ । अत्र हि शुद्धस्यैव यजिधात्वर्थस्य भावनायाम् अन्वयः । क्वचित् लक्षार्थ एव यथा "अग्नीषोमीयं पशुमालभेत" इत्यादौ "आलभते" इत्यत्र आलम्भनं च केवलं स्पर्शमात्रं तथापि यागस्वरूपघटकीभूतद्रव्यदेवतयोः विद्यमानत्वात् अन्यथानुपपत्या लक्षणया यागार्थकः धात्वर्थः इति एवं लक्ष्य अत्रापि क्वचित् शक्यार्थयुक्तः यथा "पृष्ठैरुपतिष्ठते" इत्यादौ अत्र समीप स्थितिः धातोः शक्यार्थः। "उपान्मन्त्रकरणे" इति सूत्रानुरोधेन मन्त्रकरणेर्थे वर्तमानात् उपपूर्ववत् स्थाधातोः आत्मनेपदस्य दिव्यार्थकात् आत्मनेपदविधानात् तद्रूपतात्पर्य ग्राहकानुरोधेन लक्षणया शक्यार्थविशिष्ठम् अभिधानं धात्वर्थः ।

एवं धात्वर्थस्य भावनां प्रति प्रकारत्वसिद्धौ तत्र च संसर्गः न अनुकूलवत्वम् । पचति पाकं करोति ओदनं पचति, पाकेन ओदनं करोति इति विवरणात् पाककर्मत्वस्य च प्रतीतेः कर्मत्व कारणत्वान्यतरसंसर्गेण धात्वर्थो भावनायाम् अन्वेति । यद्यपि कृतिं प्रति धात्वर्थस्य पाकस्य करणत्वं बाधितं पाकादेः कृतिसाध्यत्वात् तथापि स्वनिष्ठकरणत्वनिरूपकौदनोद्देश्यकत्वसम्बन्धेन पाकः कृ तावन्वेति। अतः करणत्वस्यापि संसर्गघटकत्वात् संसर्गोपपत्तिः ।

धात्वर्थस्य कर्मत्वकरणत्वान्यतर संसर्गेण कृतावन्वेति इति सिद्धे – कुत्र कर्मत्वेनान्वयः कुत्र वा करणत्वेनेति विचारे यत्र विधिः एवं द्वितीयान्तपदमित्युभयं न श्रूयते यथा चौत्र पचति इत्यादौ तत्र विध्यश्रवणात् इष्ठसाधनत्वज्ञानेऽपि धात्वर्थस्य कर्मत्वमेव। तत्र करणन्तु आख्यातोपत्त भावना हि करोतिना विव्रीयते सर्वत्र। करोति हि नित्यं स कर्मिका । अत एव तदर्थतया भावनयापि सकर्मकत्वं तस्मात् भावनाया कर्माकांक्षायां समानपदश्रुत्या धात्वर्थस्यैव कर्मत्वम् । अस्य लौकिकवाक्यत्वात् पाकस्य अपुरुषार्थत्वात् तत्र चौत्रादेः प्रवृत्यजनकत्वेऽपि न दोषः। वेदे तु यथा समिधो यजति इत्यादि स्थले। स्वाध्यायविध्यवगत प्रयोजनत्वानुरोधेन लडादेरेव लेट्त्वं लेडर्थकत्वं वा लक्षणया परिकल्प्यते तथा च विधित्व सिधौ विधेः प्रवर्तकत्वान्यथानुपत्या विधिसमभिव्याहृतायां भावनायाम् इष्ठभाव्यत्वावश्यं भावात् विश्वजिन्न्यायेन स्वर्गादिपरिकल्पनया परिशेषात् धात्वर्थस्य तत्र करणत्वेनैव अन्वयः । न च तत्र यागादेरपि कर्मत्वेनान्वयोऽस्तु इति शंकनीयं भावनायाः एककर्मत्वनियमात् तद्भङ्गापत्तेः । अत एव विधिसमभिव्याहारो भवतु न वा यत्र द्वितीयादिना भाव्यान्तरं हि दृष्ठं तत्र धात्वर्थस्य करणत्वेनान्वयः यथा व्रीहीनवहन्यात् ओदनं पचति इत्यादौ तत्र अवहननेन व्रीहीन् संस्कुर्यात् ओदनं पाकेन कुर्यात् इति वाक्यार्थः ।

गोदोहनेन पशुकामस्य प्रणयेत्" दध्नेन्द्रियकामस्य जुहुयात् इत्यादौ न धात्वर्थस्य कर्मत्वेनान्वयः पशुरूपस्येन्द्रियरूपस्य फलस्य च भाव्यान्तरस्य निर्दिष्ठत्वात् । नापि करणत्वेनान्वयः गोदोहनादीनां वैय्यर्थ्यापत्तेः । अतः तत्र धात्वर्थस्य अपः प्रणयति इत्यादि आश्रयतया प्रकरणप्राप्त धात्वर्थानुवादकत्वमात्रम् ।साधुत्वसिध्यर्थं धातुप्रयोगः। न तत्राश्रयत्वेनान्वयः कर्मत्वातिरिक्तस्य आश्रयत्वस्य निर्वक्तुमशयक्यत्वेन भावनायां इन्द्रियरूपफलावरुद्धायां होमस्यापि कर्मत्वेनान्वये एककर्मकत्वभंगापत्तेः। दध्ना जुहोति इत्यादौ भावनायाम् अन्वययोग्यं भाव्यान्तरं न निर्दिष्ठं धात्वर्थस्य होमादेः इष्ठसाधनत्वं च अग्नि होत्रं जुहुयात् इति प्रमाणन्तरेण प्रमितं तत्र स्ववाक्यमविधेयं गुणान्तरसत्वे धात्वर्थस्य कर्मत्वमेव । तथा च दध्नाहोमं भावयेत् इति तदर्थः एतादृशेपि विषये यदि तृतीयान्तनामधेयं श्रूयते तदा धात्वर्थस्य करणत्वमेव– यथा समे दर्शपूर्णमासाभ्यां यजेत उच्चौः प्रवर्ग्येण प्रवृणक्ति इत्यादौ ।

प्रत्ययपर्यालोचनम् –

धात्वर्थः भावनायां प्रकारत्वेन अन्वेति इति सिद्धे भावनावच्य प्रत्यये विचारः प्रवर्तते। यजेत स्वर्गकामः इत्यस्मिन् वाक्ये "यजेत" इति पदं विविच्यते। यजेत इत्यत्र अस्ति अंशद्वयं यजि धातुः प्रत्ययश्चेति। यजिधातोः यागार्थः स तु प्रत्ययांशे प्रकारतया अन्वेति । प्रत्यये अस्ति अंशद्वयं लिङ्प्रत्यः आख्यातप्रत्यश्चेति। लिङ्प्र्त्ययस्य विध्याद्यर्थाः अख्यातप्रत्ययस्य कर्तृकालकृतिसंखाद्यर्थाः व्याकरणस्मृत्या अवगम्यन्ते। अत्र सर्वे अर्थाः अख्यातोपेत भावनायां प्रकारत्वेन अन्वयन्ति इति मीमांसकानां सिद्धान्तः।

कर्तृसंख्याकालकृतय इति आख्यातप्रत्ययस्य अनेके अर्थाः सन्ति । तत्र तन्त्रवार्तिकव्याख्यन व्याजेनाह अन्नम्भट्टः सुबोधिनीटीकायाम् – "ननु आख्यातात्कर्तृविशिष्टसङ्ख्या प्रतीयत इति विशिष्टो तावच्छब्दव्यापारो वाच्यः " विशिष्टव्यापाराङ्गीकारे गौरवापत्तिरत आह आख्यात प्रत्ययेन साक्षात् कर्ता न प्रतीयते अपि तु कर्तारं विना क्रियायाः अनुपपत्तेः कर्ता आक्षिप्यते। कर्तृप्राप्तिस्तु तृतियादिकारकेणैव भवति। अतः वाक्यार्थे भावनाभिन्नसर्वेषां पदानां भावनायां प्रकारतया इति मीमांसकानां सिद्धान्तः।

।। ग्रथने आदृतानां ग्रन्थानां नामानि।।

## संदर्भ सूची


1. शाबरभाष्यम् : आनन्दाश्रमसंस्कृतग्रन्थावलिः, ग्रन्थाङ्कः–९७, वैद्यनाथशास्त्रिकृतप्रभाव्याख्यासहितम् । तन्त्रवार्तिकव्यख्यासहितं विनायकगणेश आपटे इत्याख्येन पुणेनगरे आनन्दाश्रमुद्रणालये प्रकाशितः क्रि.श – १९२९
2. तन्त्रवार्तिकम् : आपटेकुलोद्भवः गणेशात्मजो विनायकरायः आनन्दाश्रम पुणे पौषशुद्धचतुर्थ्यां भौमवासरे क्रि.श – १८५०प्रकाशितः ।
3. श्लोकवार्तिकम् पार्थसारथिमिश्रकृतन्यायरत्नाकराख्यव्याख्यया सहितम् । सम्पादकः डा॥ गङ्गासागररायः । प्रकाशकः

रत्नापब्लिकेशन्स् वाराणसि–२२१०१० क्रि.श–२१६३ विक्रम – २०५०।

4. भाट्टकौस्तुभ : सम्पादकः । पं.अ.श्रीचिन्नस्वामिशास्त्री प्रकाशकः राष्ट्रियसंस्कृतसंस्थानमानितविश्वविद्यालयः ५६–५७ इन्स्टिट्यूट्वलय जनकपुरी नवदेहली–११००५८ मुद्रकाः चौकाम्बासंस्कृतसीरिज् आपिस् वाराणसि ।
5. भाट्टदीपिका : प्रधानसंपादकः डा॥ मण्डनमिश्रः, सम्पादकः श्रीसंपन्नारायण आचार्यः, प्रकाशकः राष्ट्रियसंस्कृतसंस्थानं मानित– विश्वविद्यालयः। मुद्रकः अमरप्रिंटिङ्ग्प्रेस् दिल्लि–०६
6. महोपाध्याय श्री अन्नंभट्टविरचिता तन्त्रवार्तिकटीका सुबोधिन्याख्या मातृका